दैनिकं ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ताः

हिमाचलप्रदेशस्य संस्कृतशिक्षकाणां नूतनः प्रकल्पः

himsanskritvartah
e-Sanskritnewspaper
नवा प्रेरणा नवोत्साहः

■ पृष्ठ-3 ■ वर्ष-3 ■ अङ्क-294

1 17.08.2024 शनिवासरः वि.सं. २०८० श्रावणशुक्ल त्रयोदशी भाद्रपद 2 प्रविष्ठांशः

Website- www.himsanskritam.com Email-himsanskrit@gmail.com


१६ अगस्ततः २२ दिनांकं यावत् चलिष्यमाणस्य संस्कृतसप्ताहस्य शुभकामनाः

हिमसंस्कृतवार्ताः

## अष्टादशदिनांके कुवैत देशस्य अधिकारिक-यात्रां करिष्यति विदेशमन्त्री जयशंकरः

हिमसंस्कृतवार्ताः, 17 अगस्त। विदेशमन्त्री डॉ. एस. जयशंकरः अस्य मासस्य अष्टादशदिनांके कुवैत देशस्य अधिकारिक-यात्रां करिष्यति। स्वीय-यात्रावधौ डॉ. जयशंकरः - समकक्षेण अबदुल्ला अली अल-याहया इत्यमुना सह मिलिष्यति। डॉ. जयशंकरस्य इयं यात्रा राजनैतिक-व्यापार-निवेश-ऊर्जा-सुरक्षा- सांस्कृतिकक्षेत्रेषु द्विपक्षीय सम्बन्धान् दृढीकरिष्यति। उभावपि पक्षौ परस्पर हितमालक्ष्य क्षेत्रीयान्ताराष्ट्रिय प्रकरणेष्वपि विचाराणां आदान-प्रदान करिष्यतः।

## भारतस्य नूतनं प्रक्षेपास्त्रम् लघु उपग्रहप्रक्षेपणयानम् (SSLV-D3) साफल्येन प्राक्षिपत्

हिमसंस्कृतवार्ताः, 17 अगस्त। भारतस्य नूतनं प्रक्षेपास्त्रम् लघु उपग्रहप्रक्षेपणयानम् (SSLV-D3) गतप्रातः पञ्च-दशमलवोत्तर-पञ्चसप्तत्यधिकैक-शतं यावत् किलोग्रामभारयुक्तेन पृथिवीनिरीक्षण उपग्रहेन शून्यम् अष्ट इत्यनेन सह साफल्येन प्राक्षिपत्। तस्मिन् अपरः लघु उपग्रहः SR-0 आसीत् यत् चेन्नै-नगरस्य स्टार्टअप संस्थायाः Space Rickshaw SR-0 इत्यनेन निर्मितम् आसीत्। भारतीय-अन्तरिक्ष- अनुसन्धान-सङ्गठनेन (ISRO) इत्यनेन लघु-उपग्रहानां कृते विपण्य-प्रवृत्तेः आधारेण निम्न-पृथिवी-कक्षायां (LEO) पञ्चशतम् किलोग्राम यावत्-वहन-क्षमतया सह एसएसएलवी-विकसितम् अस्ति प्रायः सप्तदश निमेषाधिक नववादने षड्पञ्चाशत् कोटिरूप्यकाणां मूल्यव्ययेन चतुः त्रिंशत् मीटर् परिमितं यावत् ऊर्ध्वं प्रायः ऊनविंशत्यधिकैक शत टनभारयुतमं च व्यययोग्यं प्रक्षेपास्त्र प्रथमप्रक्षेपणस्थानात् मुक्तः भूत्वा ऊर्ध्वं एकस्मिन्नेव दिशायां यात्रां आरब्धवान् पुच्छे स्थूलनाराङ्ज्वालायुतः प्रक्षेपास्त्र शनैः शनैः वेगं सङ्गृह्य ऊर्ध्वं ऊर्ध्वं च गच्छति स्म। परियोजनायाः उद्देश्यस्य विषये इस्रो इत्यनेन उक्तं यत् सः एसएसएलवी विकासपरियोजनां सम्पन्नं करिष्यति तथा च भारतीय उद्योगेन तथा सार्वजनिकक्षेत्रस्य न्यूस्पेस् इण्डिया लिमिटेड् इत्यनेन परिचालनयोजनां सफलं करिष्यति।

## आगामिमासस्य अष्टादश-दिनाङ्कात् जम्मू-कश्मीर विधानसभानिर्वाचनम्, हरियाणायां अक्टोबर्-मासे



*हिमसंस्कृतवार्ताः, 17 अगस्त।* जम्मू-कश्मीर विधानसभानिर्वाचनं आगामिमासस्य अष्टादश-दिनाङ्कात् आरभ्य त्रिषु चरणेषु भविष्यति, तत्रैव हरियाणायां अस्मिन् वर्षे अक्टोबर्-मासस्य प्रथमे दिनांके एकस्मिन् चरणे निर्वाचनं भविष्यति। जम्मू-कश्मीरस्य हरियाणायाः च मतदानस्य गणना अक्टोबर्-मासस्य चतुर्थे दिनाङ्के भविष्यति । मुख्यनिर्वाचनायुक्तः राजीवकुमारः नवदिल्ल्यां जम्मू-कश्मीर-हरियाणा- राज्ययोः निर्वाचनकार्यक्रमस्य घोषणां कृतवान्। जम्मू-कश्मीरे प्रथमचरणस्य मतदानं आगामिमासस्य अष्टादश-दिनाङ्के, द्वितीयचरणस्य मतदानं पञ्चविंशतिः दिनाङ्के, तृतीयान्तिमचरणस्य च मतदानम् अस्य वर्षस्य अक्टोबर्-मासस्य प्रथमे दिनांके भविष्यति। श्रीकुमारमहोदयेन उक्तं यत् लोकसभानिर्वाचनानन्तरं जम्मू-कश्मीरे परिवर्तितः परिदृश्यः अस्ति, लोकतन्त्रस्य स्तराः च सुदृढाः भवन्ति। सः अवदत् यत् आयोगः सहचैव जम्मू-कश्मीर-हरियाणा-राज्ययोः गत्वा निर्वाचनसज्जतायाः अवलोकनं कृतवान्, जनानां मध्ये महान् उत्साहः अपि दृष्टः।

## कोलकातानगरे एकस्य प्रशिक्षु स्नातकोत्तर चिकित्सिकायाः दुष्कर्मस्यानन्तरं हत्यायाः च विरोधे सम्पूर्णे देशे प्रदर्शनम्

**हिमसंस्कृतवार्ताः, 17 अगस्त।** कोलकातानगरे एकस्य प्रशिक्षु स्नातकोत्तर चिकित्सिकायाः दुष्कर्मस्यानन्तरं हत्यायाः च विरोधे विभिन्नचिकित्सासङ्घैः निरन्तरं प्रदर्शनस्यानन्तरं अनेकेषु नगरेषु चिकित्सासेवा प्रभविता। पटनायाम् गतदिने पटना चिकित्सा महाविद्यालये चिकित्सालये च (PMCH) इत्यत्र तथा नालंदा चिकित्सा महाविद्यालये चिकित्सालये इत्येतयोः चिकित्सकाः अनिश्चितकालं यावत् प्रदर्शनं कृतवन्तः। अमृतसरे सर्वकारीयचिकित्सामहाविद्यालये चिकित्सकसङ्घः सर्वासु अत्यावश्यकसेवासु निलम्बनस्य घोषणां कृतवान्। गुरु नानक देव चिकित्सालये चिकित्सकैः विरोध प्रदर्शनं कृतवन्तः। महाराष्ट्रसङ्घः चिकित्सकसङ्घः, राज्ये चिकित्साप्रशिक्षणां संघः अपि प्रदर्शने सम्मिलिताः। हिमाचलस्य धर्मशालायामपि विरोधप्रदर्शनानि सञ्जातानि। गतसायंकाले मुम्बईनगरस्य आजाद उद्याने विरोधयात्रया प्रदर्शनस्य आयोजनं कृतम् इति संघेन उक्तम्। भारतीय-चिकित्सासङ्घन उद्घोषितं यत् कोलकातानगरे सञ्जातस्य दुष्कर्मप्रकरणस्य अनन्तरं जातायाः महिला-चिकित्सकायाः हत्यायाः विरोधे अद्य प्रातः षड्वादनतः राष्ट्रव्यापिन्यः आपात्कालिकेतर-सेवाः बाधिताः भविष्यन्ति। अनेन सङ्घेन एकस्मिन् वक्तव्ये सूचितं यत् तस्मिन् समये आवश्यकसेवाः पूर्ववत् सञ्चालयिष्यन्ते। अपि च बाह्य-रोगि- विभागः कार्यं नैव करिष्यति। वैकल्पिक- शल्य चिकित्सापि न करिष्यते। इयं घोषणा तेषु सर्वेषु क्षेत्रेषु क्रियान्विताभविष्यति यत्रापि आधुनिक-चिकित्सा-चिकित्सकैः सेवा प्रदीयते।




## संस्थाप्रमुखः चिकित्सकानाम् विरुद्धं हिंसायाः सन्दर्भ अधिकतमं षड्होरासु संस्थागत-FIR-इति पञ्जीकरणस्य उत्तरदायी भविष्यति-स्वास्थ्यमन्त्रालयः

केन्द्रीयस्वास्थ्यमन्त्रालयेन निर्देशः प्रदत्तः यत् संस्थाप्रमुखः चिकित्सकानाम् विरुद्धं हिंसायाः सन्दर्भ अधिकतमं षड्होरासु संस्थागत-FIR-इति पञ्जीकरणस्य उत्तरदायी भविष्यति। स्वास्थ्यसेवामहानिदेशकः अतुलगोयलः अस्मिन् विषये केन्द्रसर्वकारस्य चिकित्सालयानाम्, चिकित्सामहाविद्यालयानाञ्च प्रमुखाय पत्रं लिखितवान् अस्ति। कोलकातानगरे सद्यः एव एकस्याः चिकित्सिकायाः हत्यायाः प्रकरणे चिकित्सकैः विरोध प्रदर्शनानन्तरं एषः निर्देशः प्रदत्तः।

## उपराष्ट्रपतिः तेलंगाना-आंन्ध्रप्रदेशयोः द्विदिवसीययात्रायाम्

हिमसंस्कृतवार्ताः, 17 अगस्त। उपराष्ट्रपतिः जगदीप धनखडः अद्यप्रभृति तेलंगाना-आंन्ध्रप्रदेशयोः द्विदिवसीययात्रां विधास्यति। स्वीययात्रायाः प्रथमे दिवसे श्रीधनखडः तेलंगानायां कान्हा-शान्ति-वनम् इत्यस्य यात्रां करिष्यति। यात्रायाः द्वितीये दिवसे उपराष्ट्रपतिः नेल्लोरे अक्षरा- विद्यालय-परिसरस्य एवं कौशलविकासकेन्द्रस्य, स्वर्णभारतट्रस्ट एवं मुप्पावरपु इत्यस्य यात्रां करिष्यति। अनन्तरं सः मध्याह्ने आन्ध्रप्रदेशस्य वेंकटाचलमस्थाने स्वर्णभारतट्रस्ट इत्यस्य त्रयोविंशतिवर्ष पूर्त्यवसरे समारोहे मुख्यातिथित्वेन भागं भजिष्यति।

## सुभाषितम्

**सहसा विदधीत न क्रियाम्-**
**अविवेकः परमापदां पदम्।**
**वृणते हि विमृश्यकारिणं**
**गुणलुब्धाः स्वयमेव संपदः।।**

**भावार्थः-** बिना सोचे- समझे आवेश में कोई काम नहीं करना चाहिए क्योंकि विवेक में न रहना सबसे बड़ा दुर्भाग्य है, जो व्यक्ति सोच- समझ कर कार्य करता है माँ लक्ष्मी उसी का चुनाव खुद करती है।


**सूचना-** हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुद्धिनां कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम् प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला, जिला कांगड़ा हि.प्र.
पत्रव्यवहारसङ्केतः- १७७१११

## वॉयस ऑफ ग्लोबल-साउथ इत्यस्य शिखर सम्मेलनं सङ्घर्ष-खाद्योर्जा-सुरक्षा-सङ्कटानां विस्तारणाय मञ्चत्वेन कार्यं समाचरिष्यति

राष्ट्रमद्य तृतीयस्य वॉयस ऑफ ग्लोबल-साउथ इत्यस्य शिखर सम्मेलनस्य नेतृत्वं करिष्यति। शिखरसम्मेलनस्य अस्य विषयो विद्यते-सततभविष्याय एकं सशक्तं वैश्विकदक्षिणम्। विदेशमन्त्रालयेन विज्ञापितं यत् शिखरसम्मेलनमिदं सङ्घर्ष-खाद्योर्जा-सुरक्षा- सङ्कटानां तथा च व्यतीतेषु शिखरसम्मेलनेषु सञ्जातचर्चानां विस्तारणाय मञ्चत्वेन कार्यं समाचरिष्यति।

## जम्मूप्रान्तस्य अष्टजनपदेषु ऊनविंशतिः आतंकवाद-विरोधी-निरीक्षणदलानि



हिमसंस्कृतवार्ताः, 17 अगस्त। जम्मू-कश्मीर आरक्षकदलेन जम्मूप्रान्तस्य अष्टजनपदेषु ऊनविंशतिः आतंकवाद-विरोधी-निरीक्षणदलानि संस्थापितानि। अस्माकं संवाददात्रा विज्ञापितं यत् अयं पदक्षेपः जम्मू प्रान्तस्य शान्तिपूर्णक्षेत्रेषु संवर्धमानानि आतंकप्रकरणानि समालक्ष्य समुत्थापितः। इमानि दलानि नवीनतम-संसाधनैः प्रशिक्षणैश्च सुसज्जितानि भविष्यन्ति। अनेन पदक्षेपेण जम्मूक्षेत्रे आतंकगतिविधयः न्यूनाः भविष्यन्ति। एतेषु प्रत्येकस्यापि प्रभागस्य नेतृत्वं कश्चन आरक्षण-उपाधीक्षकः विधास्यति।

# हिमाचलस्य संस्कृतशिक्षकैः धर्मशालातः कृतः संस्कृतसप्ताहस्य शुभारम्भः

## संस्कृतं वैदिकभाषा अस्ति, तस्मात् एव सद्विचाराः आगच्छन्ति- हरीशगज्जूः अतिरिक्तजिलादण्डाधिकारिः कांगड़ा







### 16 अगस्ततः 22 पर्यन्तं हिमाचलस्य सर्वेषु विद्यालयेषु संस्कृतस्य कार्यक्रमाः भविष्यन्ति,- डॉ.मनोजशैलः प्रदेशाध्यक्षः

हिमसंस्कृतवार्ताः, 17 अगस्त। हिमाचलप्रदेशराजकीयसंस्कृतशिक्षकपरिषदः भाषासंस्कृति विभागः कांगड़ा इत्येतयोः सौजन्येन शुक्रवासरे शासकीय वरिष्ठमाध्यमिकविद्यालये (छात्राः)धर्मशालायां संस्कृतसप्ताहस्य शुभारम्भः संस्कृतशोभायात्रया जातः। अस्यां शोभायात्राणां राजकीयउच्चविद्यालयः भनाला, राजकीयउच्चविद्यालयः भित्तलू, राजकीयमाध्यमिकविद्यालयः भरमात, राजकीयविद्यालयः सुधेड़, राजकीयविद्यालयः कण्डबगियाड़ा, चामुण्डासंस्कृतमहाविद्यालयः इत्यादीनां विद्यालयानां छात्रैः सहितं केन्द्रीयविश्वविद्यालयस्य संस्कृतविभागस्य छात्रैः शिक्षकैश्च भागः ग्रहीतः। कार्यक्रमस्य शुभारम्भे जिलादण्डाधिकारिः कांगड़ा हरीशगज्जूः मुख्यातिथिः रूपेण उपस्थितः अभवत्।चामुण्डात्रिगर्तसंस्कृतमहाविद्यालयस्य छात्रैः वैदिकमंगलाचारणेन अतिथीनां स्वागतं कृतम्, अस्मिन्नावसरे अतिथिभिः दीपप्रज्ज्वलनपुरस्सरं भगवत्याः सरस्वत्याः पूजनं कृतम्। मुख्यातिथिः कार्यक्रमस्य अध्यक्षता केन्द्रीयविश्वविद्यालयस्य संस्कृतविभागाध्येण प्रो.योगन्द्रवर्येण कृता, डॉ.वृहस्पतिमिश्रवर्यः कार्यक्रमे मुख्यवक्तारूपेण चोपस्थितः जातः। कार्यक्रमस्य विषये सूचयन् हिमाचलराजकीयसंस्कृतशिक्षकपरिषदः प्रदेशाध्यक्षः डॉ.मनोजशैलः अवदत् यत् 16 अगस्ततः 22 पर्यन्तं हिमाचलस्य सर्वेषु विद्यालयेषु संस्कृतस्य कार्यक्रमाः भविष्यन्ति, यत्र शिक्षणसंस्थासु संस्कृतशिक्षकस्य सहयोगेन छात्राः संस्कृते चित्राणि, भाषणप्रतियोगिता, श्लोकपाठः, लेखनकार्यं, संस्कृतप्रदर्शनी चेत्यादिषु कार्यक्रमेषु भागग्रहणं करिष्यन्ति। कार्यक्रमे मुख्यातिथिः संस्कृतेन स्वभाषणस्य आरम्भं कृत्वा अवदत् यत् संस्कृतं वैदिकभाषा अस्ति, तस्मात् एव सद्विचाराः आगच्छन्ति, विद्यालयेषु अपि तस्य प्रचारः करणीयः इति। सः अवदत् यत् संस्कृतं जीवने महत्त्वपूर्णा सरणिः, ज्ञानपरम्परायाः निधिः च अस्ति। कार्यक्रमस्य अध्यक्षः आचार्ययोगेन्द्रकुमारः हिमाचलप्रदेशस्य केन्द्रीयविश्वविद्यालयस्य धर्मशालायाः संस्कृतप्राकृत-पालीविभागस्य प्रमुखः अवदत् यत् अद्य संस्कृतस्य विज्ञानस्य च समन्वयस्य आवश्यकता वर्तते, तदा एव संस्कृतं मुख्यधारायां पुनः आगमिष्यति। मुख्यवक्ता आचार्यबृहस्पतिमिश्रः उक्तवान् यत् संस्कृतं व्यवहारभाषा भवेत् तदा एव विकसितभारतस्य अवधारणा सम्भवति। परिषदः प्रदेशाध्यक्षः डॉ.मनोजशैलः अवदत् यत् सर्वकारेण संस्कृतशिक्षकाणां कृते टीजीटी पदं दत्तं किन्तु ते अद्यापि पद्दोन्नतिः नियमस्य अवसरात् वंचिताः सन्ति। एतादृशौ परिस्थितौ राज्यसर्वकारेण शास्त्रीशिक्षकाणां नियुक्तिनियमेषु परिवर्तनं करणीयः,येन भविष्ये कार्यरताः संस्कृतशिक्षकाः उत्थानं पदोन्नतिं च प्राप्नुयुः। एतेन सह वर्षाणां यावत् वृत्ते प्रतीक्षां कुर्वन्तः वृत्तिहीनाः शास्त्री उपाधिधारकाः अन्यायस्य सम्मुखीकरणं न कुर्युः। विषयविशेषज्ञानां समितिं निर्माय नियुक्तिः-पदोन्नति-नियमाः कार्यान्विताः भवेयुः। कार्यक्रमे छात्रैः सांस्कृतिकाः कार्यक्रमाः प्रस्तुताः। कार्यक्रमस्यान्ते प्रतिभागिनः छात्राः शिक्षकाश्च प्रमाणपत्रपुरस्सरं स्मृतिचिह्नेन सम्मानिताः। हिमाचलप्रदेशसंस्कृतशिक्षकपरिषदः महासचिवः अमित शर्मा इत्यनेन कार्यक्रमे सहकार्यं कृत्वा जिलाभाषासंस्कृतिविभागः कांगडा इत्यस्य जिलाभाषाधिकारिणः अमितगुलेरी वर्यस्य धन्यवादः ज्ञापितः, तस्मिन्नेव क्रमे धर्मशालाशासकीयबालवरिष्ठमाध्यमिकविद्यालयस्य प्राचार्यस्य यशपालमनकोटियावर्यस्य मीडियाबन्धुजानानाञ्च धन्यवादमपि कृतम्। कार्यक्रमसंयोजकः कांगड़ाजनपदस्य अध्यक्षः डॉ.अमनदीपशर्मा सर्वेषां कांगड़ाजनपदस्य सहयोगीशिक्षकाणां धन्यवादं कृतवान, तेनोक्तं यत् सर्वैः शिक्षकैः मिलित्वा न्यूनैव काले कार्यक्रमस्य सफलायोजना कृता। संस्कृतभारतीपक्षतः संस्कृतविज्ञानप्रदर्शन्याः प्रस्तुतीकरणं विस्तारकस्य सुनीलकुमारस्य निर्देशने अभवत्। कार्यक्रमे विशेषतया परिषद् पक्षतः महासचिवः पुनीतशर्मा, कोषाध्यक्षः अमरसिंहः, सम्पर्कप्रमुखः नितिशर्मा, आईटी.सैलप्रमुखः विजयः उपाध्यक्षः मदनशर्मा, जिलामीडियाप्रमुखः कुन्दनशर्मा, सतीवशर्मा, अनुजशर्मा, राजकुमारः, हमीरपुरस्य अध्यक्षः नरेशमलोटिया, मण्डीजनपदस्य अध्यक्षः लोकपालः, देवेन्द्रकुमारः, संजीवशर्मा, अभिषेकशास्त्री, रविशास्त्री इत्यादयः जनाः उपस्थिताः आसन् तत्रैव केन्द्रीयविश्वविद्यालयतः डॉ.रणजीतकुमारः डॉ.अर्चना, डॉ. नरेन्द्रपाण्डेयः, डॉ.कुलदीपः, डॉ.विवेकशर्मा उपस्थिता अभवन्।

## स्वातन्त्रयोत्सवे महामहोपाध्यायः केशवशर्मा हिमाचलगौरवसम्मानेन सम्मानितः




***हिमसंस्कृतवार्ताः, 17 अगस्त।*** हिमाचलप्रदेशस्य देहरायां 78 तमस्य स्वातन्त्रयोत्सवस्य आयोजनं मुख्यमन्त्रिणः गरिमामयाम् उपस्थितौ अभवत्। अस्मिन्नावसरे आयजिते कार्यक्रमे सोलनजनपदः प्रकाण्डसंस्कृतविद्वान प्रो.केशवशर्मा हिमाचलगौरवः इति सम्मानेन सम्मानितः। ध्यातव्यस्ति प्रो.केशवशर्मा पूर्वमुख्यमन्त्रिणः वीरभद्रसिंहस्य शासनकाले अपि सम्मानितः संस्कृतविद्वान अस्ति। हिमाचलप्रदेशस्य सर्वैः संस्कृतसंगठनैः अस्मिन् विषये प्रसन्नता प्रकटिता। हिमाचलराजकीयसंस्कृतशिक्षकपरिषदः प्रदेशाध्यक्षेण डॉ.मनोजशैलेन हिमसंस्कृतवार्तायाः प्रधानसम्पादकेन च प्रो.केशवाय वर्धापनानि समर्पितानि।

## HPCM : जलविद्युतोपदानं त्यजेयुः साधनसम्पन्नाः होटेलस्वामिनः च - मुख्यमंत्री सुखविन्दरसिंहसुक्खुः

हिमसंस्कृतवार्ताः - हमीरपुरम्। पूर्वसर्वकारेण राजनैतिकलाभार्थं साधनसम्पन्नजनानाम् विद्युत्देयकानि निःशुल्ककृतानि आसन्, यदा तु वर्तमानराज्यसर्वकारः निर्धनपरिवारेभ्यः अनुदानलाभं ददाति। मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः शुक्रवासरे हमीरपुरस्य दोसड़कापुलिसभूमौ राजस्वविभागस्य स्वामित्वयोजनायाः अन्तर्गतं सामान्यजनानाम् कृते सम्पत्तिपत्रवितरणस्य समारोहस्य समये सम्पन्नपरिवारेभ्यः आह्वानं कृतवान् यत् ते स्वयमेव सर्वकारीयसहायतां त्यक्तुं शक्नुवन्ति। सः अवदत् यत् बृहत् होटलानि अपि विद्युत्-जलसहायतां त्यक्तुं उपक्रमं कुर्वन्तु। मुख्यमंत्री सुखविन्दरसिंहसुक्खुः अवदत् यत् हमीरपुरं देशस्य प्रथमं मण्डलं जातम्, यत्र आबादीदेहस्य परिवारेभ्यः भूमिस्वामित्वस्य अधिकारः दत्तः अस्ति। सः अवदत् यत् राज्यसर्वकारः अपि जलस्य गुणवत्तां वर्धयितुं प्रयत्नाः कुर्वन् अस्ति। अतः जलबिलेषु अनुदानं केवलं तेभ्यः परिवारेभ्यः प्रदत्तं भविष्यति येषां वार्षिकं आयं ५० सहस्ररूप्यकात् न्यूनं भवति।




हिमाचलप्रदेशे प्राकृतिकविपदा विनाशं कृतवती अस्ति। अस्मिन् वर्षे अपि मेघविस्फोटघटनासु ३१ जनाः मृताः, अद्यापि ५० तः अधिकाः जनाः अदृश्याः सन्ति । मेघविस्फोटघटनानां अध्ययनं भविष्यति येन प्राणहानिः सम्पत्तिक्षतिः च न भवेत् इति समुचितपदानि गृहीतुं शक्यन्ते। तेन ११ तहसीलेषु प्रत्येकं १० पात्रपरिवारेभ्यः सम्पत्तिपत्राणि वितीर्य एतस्याः योजनायाः आरम्भः कृतः ।

# पाणिनिसंस्कृतविश्वविद्यालये विशिष्टव्याख्यानकार्यक्रमस्य आयोजनम्




**हिमसंस्कृतवार्ताः- डॉ. दिनेश चौबे उज्जयिनी 17 अगस्त।** महर्षिपाणिनि-संस्कृत- वैदिक- विश्वविद्यालयस्थस्य संस्कृत- शिक्षणप्रशिक्षण-ज्ञानविज्ञानसम्बर्धनकेन्द्रस्य तत्त्वावधाने आयोजिते संस्कृतसप्ताहसमारोहे प्रातः एकादशवादनात् विश्वविद्यालयस्य प्रमुखद्वारतः संस्कृतजैनसूरिमहाविद्यालयं यावत् विश्वविद्यालयस्य माननीयाः कुलगुरवः, माननीयाः कुलसचिवः तथा सर्वेऽध्यापकाः छात्राः कर्मचारिणश्च सोत्साहं संस्कृतोद्घोघपूर्वकं शोभायात्रायां सम्मिलिता अभवन्। संस्कृतस्य प्रचारार्थं विश्वविद्यालयस्य पुस्तिकाः नागरिकेषु वितरिताः, संस्कृतसप्ताहस्य शुभकामनाश्च प्रेषिताः। तदनन्तरं संस्कृतसप्ताहस्य उद्घाटनसत्रे विश्वविद्यालयस्य आदर्शवाक्यस्य 'संस्कृतं नाम दैवी वाक्' इति विषयाधारितव्याख्यानस्य आयोजनं माननीयकुलगुरूणामध्यक्षतायां 16 अगस्त, 2024 दिनाङ्के सायं 03:00 वादने आवासीयपटलमाध्यमेन सुसम्पन्नम्। यस्मिन् मुख्यवक्तृत्वेन राष्ट्रियसंस्कृत-विश्वविद्यालयस्य पूर्वकुलपतिः प्राध्यापकः डॉ. हरेकृष्णशतपथी वेदपुराणगीतोपनिषदादिभ्यः विस्तरेण अस्य विषयस्य व्याख्यानं कृतवान्। उक्तं च तेन यावत् देवभाषा जनानां भाषा न भवति तावता सार्थकता नास्ति।श्रीमद्भगवद्गीतास्थिते दैवसुरसम्पदविभागयोगे वर्णितसप्तदशदिव्यगुणान् विममर्श। अहिंसा न केवलं शरीरेण अपि तु वाचा मनसा अपि अनुसरणीया इति अहिंसाया अर्थमपि स्पष्टीचकार। ध्येयवाक्यस्य स्पष्टीकरणाय भागवतस्य माहात्म्यस्य मङ्गलाचरणस्य च श्लोकाः उद्धृताः। व्याकरणविभागस्य विभागाध्यक्षः तथा कार्यक्रमस्य संयोजकः डॉ. अखिलेशकुमारद्विवेदीमहोदयेन अतिथीनाम् अभ्यागतानां च वाचिकस्वागतं व्याहृतम्। कार्यक्रमस्य सहसंयोजकः डॉ. दिनेशचौबेमहोदयेन कार्यक्रमः सफलतया सञ्चालितः। शिक्षाशास्त्रविभागीयाचार्यः डॉ. विश्वामित्ररायमहोदयः कार्यक्रमे धन्यवादम् अज्ञापयत्।

# सर्वहितकारी विद्यामन्दिरे तलवाडा इत्यत्र शास्त्रपूजनेन संस्कृतसप्ताहस्य शुभारम्भः



हिमसंस्कृतवार्ताः, 17 अगस्त। सर्वहितकारी विद्यामन्दिरे तलवाडा इत्यत्र संस्कृतसप्ताहस्योपलक्ष्ये संकुलप्रमुखा अञ्जूशर्मा संस्कृतपरिषदः संयोजकः कपिलशर्मा च छात्रैः सह दीपप्रज्वलनं पूर्वकं शास्त्रपूजनं च कृत्वा संस्कृतसप्ताहस्य औपचारिकं उद्घाटनं कृतवन्तः। संस्कृतपरिषदः छात्रप्रमुखा अशिता मञ्चस्य संचालनं कृतवती, सलोनी इत्यनया कार्यक्रमस्य सुचारुसमाप्त्यर्थं ब्रह्माण्डीयं आह्वानं कृतम्, परिषद् सचिवः काव्यः सप्ताहे आयोजितानां कार्यक्रमानां विवरणं प्रस्तुतवान्। सम्बोधने सः छात्रान् संस्कृतभाषायाः वैज्ञानिकतां समृद्धिं च अवगतवान् ।

# रत्नाकरधौतपदां हिमालयकिरीटिनीम्। ब्रह्मराजर्षिरत्नाढ्यां वन्दे भारतमातरम्॥

### अष्टासप्ततितमस्वातन्त्र्योत्सवः

**हिमसंस्कृतवार्ताः - जगदीश डाभी 17 अगस्त।।** अगस्तमासस्य पञ्चदशतमे (15.08.2024) दिनाङ्के पश्चिमवंगस्य पूर्वमेदिनीपुरस्थे कलियाचक- विक्रमकिशोर-आदर्शसंस्कृतमहाविद्यालयस्य पावनपरिसरे अष्टासप्ततितमः स्वाधीनतादिवसो महता वैभवेन पालितोऽभवत्। अस्मिन् कार्यक्रमे प्राचार्यः डॉ. देवीपदरथमहोदयः पताकोत्तोलनं विधाय भारतीयसंस्कृतेः सुरक्षणाय परामृश्य अखण्डभारतमातुः स्वाधीनतान्दोलने दत्तप्राणानां कारावासभोगिनां महापुरुषाणां त्यागपूर्णजीवनवृत्तान्तं वरीवृत्य भारतमातरं भूयो भूयः प्रणम्य माल्यार्पणमकरोत्। ततः डॉ. सङ्कर्षणपण्डा, डॉ. नृसिंहनाथगुरुः, डॉ. दयानन्दपाणिग्राही, डॉ. सुरञ्जनपाहाढी, विमानकुमारनायकः, समरजितसाहुश्च स्वाभिप्रायं प्रकटितवन्तः। छात्राः देशात्मबोधकं संगीतं गीतवत्यः। कार्यक्रमं डॉ. किंशुकसाहा सशृङ्खलं परिचाल्य उपस्थितसर्वेभ्यः धन्यवादार्पणं कृतवान्। अन्ते प्राचार्यसमेताः समे छात्राः, प्राध्यापकाः, कर्मचारिणश्च हस्ते त्रिरङ्गध्वज विधृत्य जानपदयात्रां कृतवन्त। महाविद्यालयोऽयं क्रमशः विकाशमार्गीभूय अस्मिन्नेव प्रदेशे संस्कृतेः प्रसारणकार्ये अग्रेसरतां प्राप्स्यतीति।

# संस्कृतभारती, पालितानाद्वारा संस्कृतसप्ताह-महोत्सवस्य, संस्कृतवस्तु- पुस्तकप्रदर्शनस्य च तालुकास्तरस्य शुभारम्भः अभवत्



हिमसंस्कृतवार्ताः, 17 अगस्त जगदीश डाभी गुजरातम् ।संस्कृतसप्ताहमहोत्सवः प्रतिवर्षं संस्कृतभारत्याः, सौराष्ट्रप्रान्तेन आचर्यते, तालुकस्तरस्य संस्कृतसप्ताहमहोत्सवः संस्कृत भारतीपक्षतः पालिताणानगर्याम् अगस्तमासस्य १६तमे दिनाङ्के प्रातः ११.०० वादने महिला महाविद्यालये आरब्धः । संस्कृतभारत्याः पलिताणातालुकासंयोजकः श्री योगेशभाई पण्ड्या, केन्द्रशिक्षकः श्रीअमरसिंहः राठोड, नगर संयोजिका कृपालीभगिनी कामलिया, बालकेन्द्रसंयोजिका मायाभगिनी बोरीचा, साप्ताहिकसंयोजिका दिलशादभगिनी पाटडिया इत्येते उपस्थिताः। ध्येयमन्त्रेण मौखिकस्वागतेन च कार्यक्रमस्य आरम्भः अभवत् । *ध्येयवाक्यस्मरण*प्रतियोगिता अभवत् । आस्यां विद्यालयस्य महाविद्यालयस्य च बहवः छात्राः भागं गृहीतवन्तः। प्रथमां श्रेणीं निधिः वाळा (एम.एम.कन्या विद्यालयः), द्वितीयश्रेणीं साक्षी वाढेळ (एम.एम.कन्या विद्यालयः), तृतीयश्रेणीं जेनिलः सरवैया (पी.एन.आर.शाह प्रा.विद्यालयः) इत्येते लब्धवन्तः । महाविद्यालयस्तरे प्रथमपदं आफरीन चुडेसरा (स्नातकोत्तरकेन्द्रम् ), द्वितीयपदं दर्शना चौहाण (स्नातकोत्तरकेन्द्रस्य) इतीमे भगिन्यौ लब्धवत्यौ । आचार्यः श्री डॉ. पंकजत्रिवेदीमहोदयः संस्कृतसप्ताहमहोत्सवस्य आयोजनाय अभिनन्दनं कृतवान्। प्रबन्धिका सुश्री. दर्शना चौहान सुचारुतया समन्वयनं कृतवती । अन्ते सर्वे संस्कृत-वस्तु-पुस्तक-प्रदर्शनीम् अवलोक्य, विभिन्नसंस्कृतपुस्तकानि संस्कृतवस्तुनामानि च दृष्ट्वा आनन्दं प्रकटयन्तः , संस्कृत-भाषां प्रति स्वस्य उत्साहं च प्रदर्शितवन्तः ।

# संस्कृतभारती- पंजाबः

## संस्कृतसप्ताहस्य योजनागोष्ठी सम्पन्ना




हिमसंस्कृतवार्ताः- जगदीश डाभी 17 अगस्त। संस्कृतसप्ताहस्य पूर्वसंध्यावेलायां संस्कृतसप्ताहावसरे क्रियमाणानां कार्यक्रमाणां चर्चाविषयकी संगोष्ठी सम्पन्ना। संगोष्ठ्यां पंजाबतः चत्वारिंशतासन्नाः कार्यकर्तारः संयुक्ताः। संगोष्ठ्यामस्यां संस्कृतभारत्याः उत्तरक्षेत्रसंगठनमन्त्री नरेन्द्रवर्योऽपि संयुक्तः येन 'संस्कृतसप्ताहं कथमाचरणीयम्' विषये निजविचाराः सम्प्रेषिताः। पुनः उत्तरक्षेत्रसम्पर्कप्रमुखेन संस्कृतसप्ताहस्य शुभकामनाः दत्ताः। अस्य कार्यक्रमस्य अध्क्षतां कुर्वाणः डॉ. वीरेन्द्रकुमारः 'पंजाबप्रदेशे कुत्र कुत्र कानि कानि कार्यक्रमाणि भविष्यन्ति' विषये चर्चां कृतवान्। संगोष्ठ्याः संचालनं प्रान्त-सहमन्त्रिणा अजयकुमार आर्येण कृतम्। मन्त्रीमहोदयेन संजीवश्रीवास्तवेन आगतानां धन्यवादः कृतः। संगोष्ठ्यां पंजाब-सम्पर्कप्रमुखः उदयन आर्यः, शिक्षणप्रमुखः भगवतीप्रसादः, रूपनगतः हैपीशर्मा पंकजशर्मा अशोकशर्मा च, जालन्धरतः गोपीशर्मा, नाभासंयोजकः, पटियालामंत्री गगनदीप पाठकः, पटियालाविभागसहसंयोजकः ओमनदीपः, आयुर्वेद- महाविद्यालय- पटियालातः रीना सोढी, पातड़ांतः रिंकू शर्मा, मानसातः जगमेलशास्त्री, नाभातः प्रधानाध्यापकः जीवनमहोदयः एवं मोहितमहोदयः बरनालातः हरदीपशास्त्री प्रमुखरूपेण सम्युक्ताः आसन्।

# गान्धिदर्शनसमित्यां समुत्साहेन मानितः स्वतन्त्रतोत्सवः



हिमसंस्कृतवार्ताः, 17 अगस्त। 78तमे स्वतंत्रतादिवसावसरे गान्धिदर्शनसमित्या स्वतन्त्रता-राष्ट्रैकता-राष्ट्रियाखण्डता-विविधतानां प्रकाशनपूर्वकं देशभक्तिभावनाभरिताः नैकाः सांस्कृतिककार्यक्रमशृङ्खलाः समायोज्य स्वतन्त्रतासेनानिनां बलिदानस्य स्मरणं कृतम्। कार्यक्रमे मुख्यातिथित्वेन सामाजिकविचारकः प्रसिद्धलेखकः प्रो. राजकुमारभाटिया उपातिष्ठत, तेन समित्याः निदेशकेन डॉ. ज्वालाप्रसादेन च सम्भूय त्रिवर्णध्वजः दोधूयमानः कृतः। एतस्मिन् अवसरे प्रो. भाटियावर्यः मातृभूम्याः नाम्ना वृक्षारोपणमपि कृतवान्। अमुना भारतसर्वकारस्य 'एक पेड़ माँ के नाम' इति प्रकल्पस्य समर्थनमपि विहितम्। समारोहे अभिज्ञान-नाट्य-एसोसिएशन इत्यस्य कलाकारैः स्वतन्त्रतायाः भावनापूर्णं संगीतमयं प्रस्तुतीकरणं कृत्वा दर्शकाः मन्त्रमुग्धीकृताः।

एतद् अतिरिच्य उदयनारायणसिंहस्य नेतृत्वे अबीरासमूहस्य कलाकारैः स्वतंत्रतासंग्रामविषयकानि विभिन्नानि गीतानि प्रस्तुतानि अथ च स्वतन्त्रता संग्रामे महात्मगान्धिनः महत्वपूर्णभूमिका विषयेऽपि प्रकाशः कृतः। कार्यक्रमस्य अवसरे डॉ. ज्वालाप्रसादेन राष्ट्रभक्तेः माहात्म्यम् उपस्थितानां पुरतः व्याख्यातम्। मुख्यातिथिश्चापि गान्धिनः "चरखा" इति तुरीवेमा प्रदानेन समितेः मासिकपत्रिकाः "अन्तिम जन" इत्यस्य च प्रदानेन अमुना एव कृतः। अस्मिन् अवसरे प्रशासनिकः अधिकारी संजीतकुमारः समितेः कार्यक्रमाधिकारी डॉ. वेदाभ्यास कुंडूः चापि उपस्थितौ आस्ताम्।